# ४२. रम्या प्रदर्शिनी

तृतीया बहुवचनम्

पुत्रः - तात ! अद्य प्रदर्शिनीं द्रष्टुं किं नगरं गच्छाम ?

पिता - प्रदर्शिनी कुत्र आयोजिता अस्ति ? किं भवान् स्थलं जानाति ?

पुत्रः - प्रदर्शिनिस्थलम् अहं जानामि । गृहजनाः सर्वे गच्छाम।

पिता - अहं ५-३० वादने मम कार्यं समापयामि । गच्छाम ।

मञ्जुला - तात ! पश्यतु, प्रदर्शिनी विविधवर्णरञ्जितैः दीपैः अलङ्कृता अस्ति ।

पुत्रः - अन्तः गच्छामः । पश्यतु, दण्डैः विविधविन्यासं कृतवन्तः ।

माता - अत्र पश्यतु, शलाकाभिः चित्राणि कृतवन्तः ।

पुत्रः - तत्र गच्छाम । एका पाञ्चालिका तस्याः स्नेहितैः सह क्रीडति । अपरां पश्यतु, सखीभिः, सह नृत्यति । अन्या बालकैः युद्ध्यति ।

पिता - वत्स ! प्रदर्शिनीदर्शनार्थं वयं यत् आगतवन्तः तत् सार्थकम् अभवत् ।

माता - प्रदर्शिनी नूतनोपकरणैः सज्जीकृतवन्तः सन्ति । अस्मिन् वर्षे प्रदर्शिनी समीचीना अस्ति ।

मञ्जुला - अहो, तत्र पश्यतु अम्ब ! देवीं सम्यक् अलङ्कृतवन्तः सन्ति । अहो, अपूर्वम् । वर्णोपेतैः दीपैः,

अनेकाभिः मालाभिः, पुष्पैः, फलैः विविधैः शाकैः देव्याः मण्डपः अलङ्कृतः अस्ति । अतः सः द्रष्टॄणां सर्वेषां मनः आकर्षति । प्रथमं तत्र गच्छामः ।

माता - सत्यम्, तत्र गच्छाम । कञ्चित्कालं स्थित्वा पश्यामः । पुत्र ! भवन्तं प्रदर्शिनीविषयं कः उक्तवान् ?

पुत्रः - मम स्नेहिताः सर्वे दृष्टवन्तः । ते माम् उक्तवन्तः ।

पिता - परश्वः रविवासरः खलु ? यदि इच्छन्ति पुनः आगच्छाम । गच्छाम इदानीम् ।